09-08-2020

संस्कृतसामान्यम् । उपशास्त्री I
अनिवार्यपत्रम् । हितोपदेशः । श्लोकव्याख्या ।

"दानोपभोगहीनाश्च दिवसा यान्ति यस्य वै ।
स कर्मकारभस्त्रेव श्वसन्नपि न जीवति ॥"

सन्दर्भः → श्लोकोऽयं महाकविश्रीनारायणपण्डितेन विरचितस्य हितोपदेशस्य ग्रन्थस्य मित्रलाभाद् मूषकपरिव्राजककथात् गृहीतोऽस्ति ।

प्रसङ्गः → वीणाकर्णेन परिव्राजकेन जर्जरवंशखण्डेन ताडितः मूषकः धनहीनावस्थायां दानस्य महिमानं वर्णयति ।

अन्वयः → वै, यस्य च दानोपभोगहीनाः दिवसाः यान्ति, स कर्मकारभस्त्रा इव श्वसन् अपि न जीवति ।

शब्दार्थः व्याकरणञ्च → वै = निश्चयेन (अव्ययपदम् अस्ति।)
यस्य = यस्य पुंसः । च = तथा, अतिरिक्तः । दानोपभोगहीनाः → दान+उपभोगहीनाः, दानोपभोगाभ्यां विहीनः = दानोपयोगहीनः ।
दिवसाः = दिनानि, वासराणि । यान्ति = गच्छन्ति । स = नरः ।
कर्मकारभस्त्रा ⇒ कर्मकारस्य भस्त्रा = लौहकारस्य मशक.
इव = यथा । श्वसन् = श्वासं मुञ्चन्नपि । न = नहि ।
जीवति = जीवनं धारयति ।

तात्पर्यः → यस्य नरस्य दिनानि दानादिकर्मणा, धनोपभोगेन विना न व्यतीतानि भवन्ति तस्य पुरुषस्य जीवनं लौहकारस्य मशकेव भवति । यथा मशकः श्वासं (वायुः) त्यजति किन्तु मशके जीवनलक्षणं न भवति अपितु निर्जीवः भवति तथैव दानादिकर्म-विहीनस्य नरस्य जीवनम् ।

विशेषः → उत्प्रेक्षा तथा च अर्थान्तरन्यासालङ्कारः ।

09-08-2020

डॉ० निर्मलकुमार झा ( सम्प्राचार्य
रा० उ० सं० महावि० सरवसेना, पूर्णियाँ

09-08-2020

संस्कृतसामान्यम् । उपशास्त्री- II

अनिवार्यपत्रम् । कृत् प्रत्ययः ।

## शतृ (अनुबन्धलोपे अत्) । शानच् (अनुबन्धलोपे आन) ।

1. "लटः शतृ-शानचावप्रथमासमानाधिकरणे" →

अप्रथमान्तेन समानाधिकरणे लट स्तौ वा स्तः ।

समानाधिकरणे प्रथमाविभक्तौ लट् स्थाने विकल्पेन शतृ-शानच् प्रत्ययौ भवतः ।

" प्रथमाविभक्तिभिन्ने लट् स्थाने नित्यं शतृ-शानच् प्रत्ययौ भवतः ।

यथा → पचन्तम् (पकाते हुए) । पचमानम् ।

पचन्तं पचमानं वा चैत्रं महाराजं वा पश्य ।

पकाते हुए चैत्र अथवा रसोईये को देखो ।

शतृ प्रत्ययः परस्मैपद धातुना सह भवति । शानच् प्रत्ययः आत्मनेपदी धातुना सह भवति ।

शतृ प्रत्यय रूपं पुंलिङ्गे धावत् शब्दानुसारेण, स्त्रीलिङ्गे नदी शब्दानुसारेण क्लिवलिङ्गे जगत् शब्दानुसारेण भवति ।

शानच् प्रत्ययान्त शब्दरूपं क्रमशः देव, लता तथा फलम् शब्दानुसारेण विभिन्नेषु लिङ्गेषु भवति ।

(√पठ् + शतृ = पठत् ।
पठन्-पठन्तौ-पठन्तः (पुंलिङ्गे)
पठन्ती-पठन्त्यौ-पठन्त्यः (स्त्री०)
पठत्-पठती-पठन्ति (नपुं०))

2. लृटः सद्वा → लृट्लकारेऽपि एष नियमः । यथा → करिष्यन्तं करिष्यमाणं पश्य (भविष्य में आगे करनेवाले को देखो ।)

3. शतृ तथा शानच् प्रत्ययान्त रूपाणि → धातु + शतृ, धातु + शानच्

√भू - शतृ = भवत् | भू+शानच् = X

पचत्, पचमानः । भुञ्जत्, भुञ्जानः ।

यजत्, यजमानः । कुर्वत्, कुर्वाणः ।

याचत्, याचमानः ।

X, लभमानः ।

X, सेवमानः ।

X, वर्तमानः ।

X, कम्पमानः ।

09-08-2020

डॉ० निर्मल कुमार झा, (स०प्राचार्य)।
रा० उ० सं० महाविo सुखसेना, पूर्णियाँ ।

09-08-2020

अनिवार्यपत्रम् ।

शास्त्री II

व्याकरणछात्रहेतवे । रघुवंशम् । श्लोकव्याख्या ।

"यस्यावरोधस्तनचन्दनानां प्रक्षालनाद्वारिविहारकाले ।
कालिन्दकन्या मथुरां गतापि गङ्गोर्मिसंसक्तजलेव भाति ॥"

सन्दर्भः→ प्रस्तुतोऽयं श्लोकः कविकालिदासविरचितस्य रघुवंश-महाकाव्यस्य षष्ठसर्गात् स्वयंवरवर्णनप्रसङ्गात् अवतरितोऽस्ति ।

प्रसङ्गः→ कविरत्र सुषेणस्यान्तःपुरस्त्रीजनविलासजीवनं प्रतिपादयति ।

अन्वयः→ यस्य वारिविहारकाले अवरोधस्तनचन्दनानां प्रक्षालनात् मथुरां गतापि कालिन्दकन्या गङ्गोर्मिसंसक्तजला इव भाति ।

शब्दार्थः व्याकरणञ्च → यस्य = सुषेणस्य । वारिविहारकाले → वारिषु विहारस्य कालः, तस्मिन् = जलक्रीडावसरे ।
अवरोधस्तनचन्दनानाम् → अवरोधानां स्तनेषु चन्दनानि, तेषाम् = अन्तःपुराङ्गनाकुचमलयजानाम् । प्रक्षालनात् = क्षालनात् ।
मथुराम् = मथुराराजधानीम् । गतापि = प्राप्तापि । कलिन्दकन्या → कलिन्दस्य कन्या या सा = यमुना । गङ्गोर्मिसंसक्तजला → गङ्गाया उर्मिभिः संसक्तं जलं यस्या सा = गङ्गातरङ्ग-सम्मिलितसलिला । इव = यथा । भाति = शोभते, विराजते ।

तात्पर्यः → राज्ञः सुषेणस्य स्त्रीणां स्तनेषु संलग्नचन्दनप्रक्षालनात् गङ्गा-तरङ्गमिलितं यमुनाजलमिव मथुरायां सङ्गम दृश्यः प्रतीयते ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः माधुर्यगुणः, उत्प्रेक्षालङ्कारः, उपजातिवृत्तिञ्च ।

09-08-2020

डॉ० निर्मलकुमार झा, (स०प्राचार्यः
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ